# भारतविजयस्तोत्रम्

Bharatavijayastotram

sanskritdocuments.org

February 19, 2019

# Bharatavijayastotram

# भारतविजयस्तोत्रम्

## Sanskrit Document Information

Text title : bhAratavijayastotram

File name : bhAratavijayastotram.itx

Category : devii

Location : doc_devii

Author : Maheshvaranandasarasvati

Proofread by : Aruna Narayanan narayanan.aruna at gmail.com

Description/comments : Brihat Stotra Ratnakar Shivadutta Shastri

Latest update : February 19, 2019

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

February 19, 2019

*sanskritdocuments.org*

# भारतविजयस्तोत्रम्

मङ्गल्योल्लासलीलः करट-मदनदी-स्नान-पानप्रमत्त-
श्चञ्चद्भिश्चञ्चरीकैः कलित-कलकलः स्वस्ति-पुण्याह्वघोषैः ।
दोर्दण्डैरस्त्र-शस्त्र-प्रहरणपटुभिर्ज्वाल-माला-जटालैः
प्रत्यूह-व्यूहहन्ता जनयतु विजयं कुञ्जरग्रामणीर्नः ॥ १॥

दिव्यैस्तेजोभिरिद्धा प्रबल-भुजवनोत्ताल-कीलायुधाढ्या
सिंहस्कन्धाधिरूढा विपुलबल-वलद्वाहिनी-व्यूहभीमा ।
गर्जातर्जाः सृजन्ती महिषमरिचमूं मथ्नती रिष्टिवृष्ट्या
तुष्टा स्वेष्टा विशिष्टा घटयतु घटनाश्चण्डिका नः प्रचण्डा ॥ २॥

सङ्कल्पानल्पलीला-क्षण-गण-जनितानन्त-सृष्टिप्रवाहः
सर्वज्ञः सर्वशिक्तः श्रुतनुतमहिमा मेदुर-श्रीमनोज्ञः ।
लोकग्रास-प्रसक्त -प्रलय-घनघटाटोप-घोरान् मयादीन्
धुन्वन् ध्वस्तान् धिनोतु ध्वनित-जयरवैधूर्धरो धूर्जटीनः ॥ ३॥

लोकालोकाग्रजाग्रन्मद मुदिर-महाचण्डशौण्डोग्रदण्डः
प्रोद्दण्डो दानवेन्द्रो विजितवसुमतीवैभवः स्वर्णशय्यः ।
यत्तीव्राघातरूक्षा-क्षत-खरनखरैर्दीर्घनिद्रां सहेलं
प्राप्तः सोऽव्याजभव्यः कलयतु कुशलं भारतस्याद्यसिंहः ॥ ४॥

सर्वां सृष्टिं समस्ताञ् जनगणनिकरान् व्यश्नुवानं समन्ताद्
ध्वान्त व्यात्तास्यघोरं मलिनितजगती-जालमुद्यन् विभिन्दन् ।
तीव्रै जाग्रत्प्रवेगैर्ज्वलन-कण-गणोद्गगुण-गर्वैरखर्वै-
रुस्रैरश्रान्त-नेमिर्दिशतु विजयिनीं सुश्रियं श्रीरविर्नः ॥ ५॥

श्रीमन् भूताधिनाथ-प्रमथगणपते सर्वशक्ते पुरारे
सर्वोत्तुङ्गे हिमाद्रे सुरुचिरशिखरे वैजयन्ती जयन्ती ।
प्रोच्चैरुड्डीयमाना चिरतरमहिमा भारतीया लसन्तीं
प्राग्वद् दोधूयमाना विहरतु गगने विश्ववन्द्याभिनन्द्या ॥ ६॥

वेदाः शास्त्राणि यागाः शुचिरुचिरुचिरा आश्रमा वर्णभागा-
स्तीर्थान्यस्वप्नसौधा जनगणविततता संस्कृतिः सभ्यता च ।
सम्पूर्णो धर्मराशिः प्रशमितविपुलापत्तिराष्ट्रं समग्रं
वृद्धिः सिद्धिः समृद्धिः सकलसुरपतेऽक्षुण्णतां नीयतां नः ॥ ७॥

सर्वाधिष्ठानभूमन् भरतभुवनिमां व्योमयानैरसङ्ख्यैः
शस्त्रास्त्रैर्नैकभेदैरतुलित-विभवैर्घोर-सामर्थ्य-सार्थैः ।
दुर्धर्षा दुर्विभेद्या कलित-नव नवोत्साहपर्णाभ्युदीर्णा
सङ्ख्यातीताप्रतूर्णं जयतु खलबलं वाहिनी भारतीया ॥ ८॥

देशेऽस्मिन् द्राक् समस्ते विपुल-जयरवो दुन्दुभिर्ध्वानधीरः
यूनामुत्साह-सिंह-ध्वनिभिरविरतं श्रूयतां श्रीनिवास ।
किञ्चार्यावर्त-भूमिर्निज-विजयलसत् प्राज्य-सौराज्यसिम्नां
पूर्णाखण्डद्युतीनां प्रगुणितगरिमा स्यात् खनिर्वर्धितानाम् ॥ ९॥

ध्वस्तानः शत्रवः स्युस्त्वरितमिहसुखाः सन्तु गावः समग्राः
सर्वे नार्यो नराश्च प्रमथित-विपुलापत्तयः सन्तवदीनाः ।
भूमिः सस्याभ्युदीर्णा खल-बलजयिनी वाहिनी नोऽस्त्वजय्या
भयात् भूयो भवानीप्रभुरयमखिलानुग्रहे रक्षको नः ॥ १०॥

सर्वैर्नव्यैरसङ्ख्यैर्गुणगण-भरितैः सज्जितानो युवानः
सोत्साहाः सङ्घबद्धाः प्रबलरिपुचमूनाथलीलावदानाः ।
सङ्ख्यातीताः पतन्तः करिनिकरदलत् सिंहविक्रान्तवीर्याः
श्रीनाथानुग्रहात्ते विजयमलमरं मोदमाना लभन्ताम् ॥ ११॥

इति काशीपीठाधीश्वर-जगद्गुरु-शङ्कराचार्यस्वामि-
श्रीमहेश्वरानन्दसरस्वतीविरचितं१ भारतविजयस्तोत्रं समाप्तम् ।

(१। २०१९ संवदि चीनाक्रमणावसरे वाराणसेय-संस्कृत-
विश्वविद्यालयोपकुलपतिश्रीसुरतिनारायणमणित्रिपाठिमहोदयैः
प्रार्थनया स्तोत्रमिदं विरचितम् । न्यूनाधिकभावेन तत्राऽन्यत्र
च संस्कतसंस्थानेषु प्रार्थनायां सुगृहीतमभवत् ।)

Proofread by Aruna Narayanan narayanan.aruna at gmail.com

*Bharatavijayastotram*

pdf was typeset on February 19, 2019

Please send corrections to *sanskrit@cheerful.com*